# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १७१



एकसप्तत्यधिकशततमः सर्गः १७१

श्रीवसिष्ठ उवाच ।

संविदाकाशकचनमिदं भाति जगत्तया ।

वस्तुतो न जगन्नाभा न शून्यं न च संविदः ।। १

यदिदं भाति चिद्व्योम जगदाख्यं न तत्ततः ।

आकाशादिव शून्यत्वमन्यदन्यदपि स्थितम् ।। २

देशाद्देशान्तरप्राप्तौ मध्ये यत्संविदो वपुः ।

तद्दृश्यमिति भातीदं दृश्यमन्यन्न विद्यते ।। ३

महाप्रलयसंपत्तावादिसर्गः पुनः किल ।

परस्मात्कारणाभावे कुतो दृश्यस्य संभवः ।। ४

तदाणुमात्रमपि हि दृश्यबीजं न विद्यते ।

किल यस्मादिदं चक्रं पुनर्मूर्तं प्रवर्तते ।। ५

उत्पन्नमेव नैवातो मूर्तं दृश्यमिदं जगत् ।

वन्ध्यापुत्र इवात्यन्तमतोऽस्त्येव न दृश्यधीः ।। ६

यच्चेदं किंचिदाभाति दृश्यमित्यभितः स्थितम् ।

तच्चिन्मात्रं खमेवाच्छं परमेव पदं विदुः ।। ७

यथा सुषुप्तात्स्वप्नत्वं गच्छद्यात्यनवस्थितिम् ।

चिन्मात्रमजहत्स्वच्छं निजं रूपमनामयम् ।। ८

सर्गस्यादौ तथैवेदमात्मैव स्वात्मनात्मनि ।

व्योमात्मैव चिदाभासं दृश्यमित्यवभासते ।। ९

यथा पुरतया भाति मनः संकल्पमन्थरम् ।

तथा दृश्यमिवाभाति सर्गादौ चिन्नभः परम् ।। १०

यथात्मन्यनिलः स्पन्दश्चक्रावर्तवदीहते ।
सर्गादौ चिन्नभः स्थित्वा दृश्यमित्येव तिष्ठति ।। ११
अतो ज्ञातमनाभातमेव दृश्यं जगत्त्रयम् ।
ब्रह्मैवेदं परं भाति स्वात्मनीत्थमवस्थितम् ।। १२
नास्त्येव मूर्तं पृथ्व्यादि किंचनापि कदाचन ।
अस्तु मूर्तममूर्तं वा ब्रह्मैवेदं विराजते ।। १३
प्रबोधकाले स्वप्नाद्रिर्यथा व्योमैव निर्वपुः ।
तथेदं शान्तचिन्मात्रं खं प्रवोधे जगत्त्रयम् ।। १४
प्रबुद्धानां परं ब्रह्म निर्विभागमिदं जगत् ।
धीमन्तोऽपि न तद्विद्मो यदिदं त्वप्रबोधनम् ।। १५
देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपुः ।
स्वस्वभावो हि भूतानां तत्पदं परमात्मकम् ।। १६
देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपुः ।
एतत्तत्परमाकाशमत्र सर्वं प्रतिष्ठितम् ।। १७
यादृगेतत्पदं तादृगिदं सदसदात्मकम् ।
येनार्थपञ्चकादन्यत्किंचनापि न विद्यते ।। १८
रूपालोकमनस्कारा एतदेव पदं विदुः ।
एते ते द्रवतावर्ताः पदस्यास्य महाम्भसः ।। १९
देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपुः ।
एतस्याव्यतिरेकेण जगत्ता नास्ति काचन ।। २०
रागद्वेषादयो भावा भावाभावदृशस्तथा ।
एतद्रूपममुञ्चन्त एतस्यावयवाः स्थिताः ।। २१
त्यक्त्वा पूर्वापरे कोट्यौ मध्ये यत्संविदो वपुः ।
स स्वभावः परो ज्ञेयो जगत्पयसि संज्ञितः ।। २२
देशाद्देशान्तरप्राप्तौ विद्धि मध्यमसंविदः ।
जगदित्यपरं नाम स्वरूपादच्युतात्मनः ।। २३

आदिसर्गात्प्रभृत्येव दृश्यमुत्पन्नमेव नो ।
यन्नाम तदिहास्तीति मायाशम्बरडम्बरः ।। २४

कष्टं नास्त्येव यद्दृश्यं तदप्यस्तीति संस्थितम् ।
यदप्यस्ति परं ब्रह्म कष्टं नास्तीति तत्स्थितम् ।। २५

अब्रह्मण्यं क्व गच्छामि विपरीतमतो जगत् ।
असदृश्यं सदित्युक्तं ब्रह्मैवं नावगम्यते ।। २६

न चोत्पन्नं न चाभाति दृश्यं किंचन कुत्रचित् ।
यदिदं भाति तद्ब्रह्म व्योमैव कचति स्वयम् ।। २७

यथा मणिः प्रकचति स्वभासाऽव्यतिरिक्तया ।
आत्मनोऽनन्यया सृष्ट्या चिद्व्योम कचितं तथा ।।२८

तस्मिन्नेव पदे शान्ते तपत्येष दिवाकरः ।
तस्यैवावयवश्चैव न नामान्योऽस्ति भास्करः ।। २९

स्थितोऽपि तत्र न तपत्यर्को न च निशाकरः ।
प्रकाशयति देवोऽसावर्कं नार्कस्तमीश्वरम् ।। ३०

तस्य भासा विभातीदं तदहो दृश्यमण्डलम् ।
सर्वचन्द्रार्कवह्नीनां पदार्थानां स दीपकः ।। ३१

स साकारो निराकार इति शब्दार्थकल्पना ।
खपुष्पवदसद्रूपा न संभवति तद्विदाम् ।। ३२

साङ्गभूतो यथैकोऽणुर्भाति जीवार्कतेजसि ।
न भान्ति भान्ति वा तत्र तथा सूर्यादयोऽणवः ।।३३

चिन्मात्राकाशरत्नस्य सृष्टयोऽर्कादिसंयुताः ।
या भासस्ताः कथं तस्माद्व्यतिरिक्ताः स्युरुच्यताम्।।३४

चिन्मात्रेणापि रहितं शून्यत्वेनापि वर्जितम् ।
पदं सर्वात्मरिक्तं तत्सर्वार्थैश्च समन्वितम् ।। ३५

पृथ्व्यादीन्यपि सन्त्येव तत्र सन्ति न कानिचित् ।
जीवन्तोऽपि न विद्यन्ते जीवास्तत्र च केचन ।। ३६

अत्यजन्तो द्वयस्थौल्यं तत्रैते परमाणवः ।

स्वरूपमत्यजद्द्वैतमैक्यं वात्र न किंचन ।। ३७

किंचिदत्र न किंचिद्वै न किंचिच्च न किंचन ।

किंचिन्न किंचिदित्येषा कलनात्रातिदूरगा ।। ३८

एका निरन्तरानन्ता नित्यमत्याततात्मना ।

चिन्मात्रव्योमसत्तैव जगन्नाम्नात्मनि स्थिता ।। ३९

एकं चेत्यं त्यक्तवत्या अप्राप्तायाश्रितोऽपरम् ।

यद्रूपं जगतो रूपमस्य नानात्मनोऽपि तत् ।। ४०

नानेवेदमनानैव चिद्व्योमैवेदमाततम् ।

भूतपञ्चकरूपेण स्वप्ने चितिरिव स्थितम् ।। ४१

सुषुप्ताद्विशतः स्वप्नं सुषुप्तस्थैव चिद्यथा ।

यथा स्थितैव स्वप्नत्वमेत्येवं सर्गतामिमाम् ।। ४२

यादृक्सुषुप्तं स्वप्नस्तु तादृगेव तथैव च ।

जाग्रत्तुर्यं तथैवेदमतो व्योमसमं जगत् ।। ४३

जाग्रत्स्वप्नः सुषुप्तं च तुर्यमेवाखिलं स्थितम् ।

तत्त्वविद्गोत्रमूढस्तु यद्वै वेत्ति न वेद्मि तत् ।। ४४

जडानामजडानां यः सर्वार्थानामनारतम् ।

दुर्लक्ष्यपरिणामोऽन्तर्मनोबुद्ध्यादिवर्जितः ।। ४५

सुशुद्धायाश्रितो रूपं पदार्थास्तन्मयाश्च ते ।

ते वसन्ति न सद्रूपास्तदेव हि तथा स्थितम् ।। ४६

परिणामादिशब्दार्थदृशामत इहानघ ।

उपदेशार्थमुक्तीनां गन्धोऽप्येवं न विद्यते ।। ४७

आदिसर्गात्प्रभृत्येव महासत्तात्मनात्मनि ।

चिन्मात्रपरमाकाशं स्थितमेकं महात्मनः ।। ४८

प्रपूर्णैकात्मनि प्रख्या सा सर्वव्यापिनी चितिः ।

स्थिता तयात्मन्येवान्तर्जगदित्यभिधाः कृताः ।। ४९

परिज्ञाते यथा स्वप्ने स्वाङ्गीकारात्सुखं सुखम् ।

अनङ्गीकारतो दुःखं सदुःखं भवति क्षणात् ।। ५०

गच्छतस्तिष्ठतश्चैव जाग्रतः स्वपतस्तथा ।

नित्यमेकं समाधानं स्थितं शान्तस्य तद्विदः ।। ५१

भेदेऽप्यभेदनिष्ठस्य दुःखेऽपि हि सुखस्थितेः ।

सतोऽप्येवासतो ज्ञस्य किमन्यदवशिष्यते ।। ५२

न संत्यजति नादत्ते किंचिद्व्यवहरन्नपि ।

हृदयेन बहिःकार्येऽकार्यं एवावतिष्ठते ।। ५३

यथा हिमस्य शीतत्वं वह्नेरौष्ण्यं तथेदृशः ।

स्वभावोऽस्य भवेन्नित्यं न त्वाहार्यो गुणोऽस्य सः।। ५४

यस्य त्वेष स्वभावः स्यान्न नाम न स तत्त्ववित् ।

एतदेवाज्ञताचिह्नं यदिच्छा प्रकृतेतरा ।। ५५

आश्वस्तान्तःकरणः

क्षीणविकल्पः स्वरूपसारमयः ।

परमशमामृततृप्त-

स्तिष्ठति विद्वान्निरावरणः ।। ५६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० उ० दैतैक्यनिरामययोगोपदेशो नामैकसप्तत्यधिकशततमः

सर्गः ।। १७१ ।।